
# antidote
Indian remedies to global issues

## (SOLUTIONS TO CONTEMPORARY GLOBAL ISSUES - INDIAN CULTURE AND APPROACH)




Editor

**PRINCIPAL**


Shri Somnath Education Society

**SMT. C.P. CHOKSI ARTS & SHREE P.L. CHOKSI COMMERCE COLLEGE, VERAVAL**

**ANTIDOTE INDIAN REMEDIES TO GLOBAL ISSUES**

*(SOLUTIONS TO CONTEMPORARY GLOBAL ISSUES - INDIAN CULTURE AND APPROACH)*

© Editor - Prin. Dr. R. P. Mehta

©Co-editors - Dr. A. M. Chocha
- Dr.. S. J. Vaghela
- Dr. N. R. Suba

(પ્રસ્તુત પુસ્તકમાં રજૂ કરેલી દરેક બાબતોની જવાબદારી જે તે લેખનકર્તાની છે.)

**પ્રાપ્તિ સ્થાન :**
Shri Somnath Education Society
Smt. C. P. Choksi Arts and Shree P. L. Choksi Commerce College,
Veraval.

**ISBN No. 978-93-86103-79-6**

**પ્રથમ આવૃત્તિ : ૨૦૧૭**

**કિંમત : ₹ ૩૫૦/—**

**Editor**
**PRINCIPAL**
Smt. C. P. Choksi Arts and
Shree P. L. Choksi Commerce College.
Veraval.

**Printer & Publisher**
**Kamlesh Prakashan Mandir**
G-52, Neo Square, P.N. Marg,
Near Income Tax Office,
Jamnagar - 361008.
Contact : 9879427072 / 9824163463
E-mail : kamleshprakashan@gmail.com

# भागवद्-विष्णुपुराणयो: प्रलयनिरूपणम्

**डॉ.महेन्द्रकुमार अं. दवे**

एसोसियेट प्रोफेसर, साहित्यविभाग, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावल

पुराणेषु पंचलक्षणेषु द्वितीयलक्षणमस्ति 'प्रतिसर्ग:' । पुराणद्वारा प्रतिसर्गस्य स्थानेऽनेके पर्यायवाचीन: शब्दा: व्ययहृता: सन्ति । यथा लय,प्रलय:, अन्तर्प्रलय:, प्रतिसञ्चर:,प्रतिसंक्रम:, प्रत्याहार:, प्रसञ्जम:, उपसंहति:, अन्तराला, सम्प्लव:,आभूतसम्प्लव:, उदाप्लुत:, निरोध:,संस्था,एकार्ववावत्या,तत्त्वसतिसंयमश्च इति ।

पुराणलक्षणे सन्निविष्टत्वात् प्राय: सर्वेषु पुराणेषु (प्रतिसर्गस्य ) प्रलयस्य वर्णनमस्त्येव किन्तु विशेषरूपेण ब्रह्मपुराणे (२३१-२३३), विष्णुपुराणे(६/३-४ अध्याययो) वायुपुराणे(१००/११८-२४३श्लोकेषु) श्रीमद्भागवते (१२/४/४-८श्लोकेषु), मार्कण्डेयपुराणस्योत्तरार्द्धे (४५/५-६१श्लोकेषु) गरुडपुराणे(२१५-१६अध्याययो:) तथा ब्रह्माण्डपुराणस्योपसंहारपादे तृतीयेऽध्याये वर्णनं विद्यते ।

यथा वर्षाया आगमनेन पृथ्वी उपरि स्थितानि बीजानि बहुविधलता गुल्मतृणादिरूपेण स्वयं प्रादुर्भवन्ति । तथैव सृष्टे:अनन्तरं जगत: प्रलयावस्थाऽपि समागच्छति । तथा च वर्तमानाया: सृष्टे कदा प्रलयोभविष्यतीति प्रश्नस्योत्तरं पुराणेषु महत्या वैज्ञानिकपद्धत्या प्रदत्तमस्ति ।

प्रलयभेदा:-

पुराणानुसारं प्रलयस्य चत्वारो भेदा भवन्ति (१) नैमित्तिकप्रलय: (२) प्राकृतिकप्रलय: (३) नित्यप्रलय: (४) आत्यन्तिकप्रलयश्च यथा भागवते कथितमस्ति यत्-

नित्योनैमित्तिकश्चैव तथा प्राकृतिको लय: ।
आत्यन्तिकश्च कथित: कालस्य गतिरीदृशी ॥1

विष्णुपुराणेऽपि कथितमस्ति यत् –

नित्य नैमित्तिकश्चैव प्राकृतोऽत्यन्तिकस्तथा ।
नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विध: ॥2

(१) **नैमित्तिक:प्रलय:-**

नैमित्तिकप्रलयो ब्रह्मणो दिवसावसानकाल पर्यन्तमेव भवति ।अयमेव ब्रह्मणो रात्रिरभिधीयते,यत्र चतुर्दश भववो भवन्ति । यथा-

सकल्पी यत्र मनवश्चतुर्दश विज्ञायते ।
तदन्ते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता ॥3

तत्र निद्रालुर्ब्रह्मा समस्तं विश्वं स्वोदरे संहृत्य स्वकारणस्वरूपे शेषशायिनि नारायणो लीन: शेषशय्यायां शेते ।

एष नैमित्तिक: प्रोक्त: प्रलयो यत्र विश्वसृक् ।
शेतेऽनन्तासनो विश्वमात्मनासृत्कृत्य चात्ममू :।4

विष्णुपुराणेऽपि कथितमस्ति यत्-

एष नैमित्तको नाम मैत्रेय ! प्रतिसञ्चर: ।

निमित्तं तत्र यच्छेते ब्रह्मरूपधरो हरि: ॥5

आंशिकपूर्णश्च द्विविधो नैमित्तिक:प्रलयोऽस्त: । तत्र एकस्मिन् मन्वन्तरे समाप्ते भगवदिच्छया मन्वन्तर मध्ये वा आंशिक प्रलयो भवति । किन्तु ब्राह्मणो दिनावसाने तद्रात्रौ पूर्णे प्रलये समस्तायां पृथिव्यां जलमग्नयाम् उपरितना भूर्भुव: स्वरिति त्रयो लोका विच्छिन्ना भवन्ति । तेभ्य ऊर्ध्वस्थाश्चत्वारो महर्जन तप:सत्यलोका: स्वस्थाने तथैव तिष्ठन्ति ।महर्लोक निर्वासिनो महर्षय: सिद्धाश्च तापसन्तप्ता: सन्त: ऊपरि जनादि लोकेषु गत्वा ध्यानपरायणास्तिष्ठन्ति ।

(२) **प्राकृतिक: प्रलय:-**

ब्रह्मणो द्विपरार्द्धस्यायुष: समाप्तो सप्त प्रकृतय: ( महत्तत्त्वम्,अहङ्कार:,पञ्चतन्मात्राश्च) स्वकारणे अव्यक्ते प्रकृतौ संप्रलीयन्ते । अतोऽयं प्राकृतिक:प्रलय: कथ्यते । यथा–

द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मण: परमेष्ठिन: ।

तदा प्राकृतय: सप्त: कल्प्यन्तेप्रलयाय वै ।।

एष प्राकृतिको राजन् ! प्रलयो यत्र लीयते ।

अण्डकोशस्तु संघातो विधात उपसादिते ॥6

प्राकृतिके प्रलये समुपस्थिते विश्वस्मिन् अतिभीषणस्य संहारस्य दृश्यमुपतिष्ठते । तत्र प्रथमं शतवर्ष पर्यन्तं वृष्टेरभावादन्तस्यानुपलब्धौ निरन्ने ह्यन्योन्यं भक्ष्यमाणानां परस्पर विलोकमानानाम् मृत्युग्रासभूतानां प्रजानाम् जीवनलीला समाप्तिमेति । उपरि देदीप्यमानै: प्रचण्डमार्तण्डकिरणै: पातालस्य संकर्षणमुखोत्थि तस्याग्नेरति तीव्र रया ज्वालया स्थावरजङ्गमात्मकं समस्तं जगद् भस्मसात् जायते ।

महदाद्यं विशेषान्तं यदा संयाति संक्षयम् ।

प्राकृत: प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकै: ॥

प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥7

विष्णुपुराणेऽपि कथयति यत् प्रकृति: तत्प्रेरक: पुरुषश्चेत्युभौ निर्गुणे निष्क्रिये परमात्मनि प्रत्रीयते –यथा-

प्रकृतिर्यामयाऽख्याता व्यक्ताव्यक्तस्वरूपिणी ।

पुरुषश्चाप्युभावेतौ लीयते परमात्मन8

आद्यन्तशून्य: नित्यं परमात्मा सर्वेषाकारकं विद्यते । अतो न तस्य कश्चन लयो भवति, परंतु प्रकृति-पुरुषयो : सत्त्वादय: शक्तय: कालप्रभावाद् विवशीभूता: क्षीणा:सत्य: स्वकारणे परमात्मनि प्रविलीयन्ते एव । एवं प्राकृतप्रलयदशायां केवलं परमात्मतत्त्वम् स्थिरो भवति ।

(३) **आत्यन्तिक:प्रलय: -**

कल्पावसाने नैमित्तिकप्रलय:,ब्रह्मण आयुष्य:शेषे सम्पद्यते । किन्तु आत्यन्तिकस्य प्रलयस्य कश्चन कालो निश्चितो नास्ति । आत्मानात्मविवेक द्वारा

अज्ञानापनयनपूर्वकं मायामये अहङ्कारबन्धने छिन्ने आत्मस्वरूपस्य साक्षात्कारे सति ज्ञानोदये जाते भवति आत्यन्तिक:प्रलय: । यथा भागवते कथितमस्ति यत् –

यदैवमेतेन विवेक-हेतिना मायामयाहङ्करणात्म-बन्धनम् ।
छित्वाऽच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमङ्ग ! संप्लवम् ॥9

(४) **नित्य:प्रलय:-**

सृष्टि : परिवर्तमानाऽस्ति । सर्वदा प्रलयस्य आविर्भावो भवति एव । यथा भागवतपुराणे कथितमस्ति यत् "नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप: ।
उत्पत्तिप्रलयावेके सूक्ष्मज्ञा: सम्प्रचक्ष्यते ॥10

अहर्निशं निद्रासमये यदा समस्तारज्ञाने विलिना भवति । तदा कस्यापि विशेषस्य भावस्यानुभवो न भवति ।

ब्राह्मो नैमितिकस्तत्र शेतेऽयं जगतीपति: ।
नित्य: सदैव भूतानां यो विनाशो दिवानिशम् ॥11

प्रलयविषये वैज्ञानिका:ज्ञातुम् कदाचित् न शक्नुवन्ति परन्तु पौराणिकै:योगदृष्टिबलेन प्रलय: सम्यग् ज्ञायते । अत:एव ते तेषां निश्चितस्य समयस्य निर्देशं कुर्वन्ति ।

एषां विविधरूपाणां प्रलयानां चिन्तनेन विश्वस्य नानानामरूपाणामभावस्य ज्ञानं जायते , पुनर्भाव -अभावयोराश्रयस्य परमात्मनश्च सम्यगुपलब्धि र्भवितुमर्हति ।

वस्तुत: नित्यनिरञ्जनस्य परमेश्वरस्य दिनं ,रात्रि: वर्षपरिमाणो भवितुम् न अर्हति । नाप्यायुष्य: क्षय:सम्भवति । विष्णुपुराणे कथितमस्ति यत् –

द्विपरार्द्धात्मिक: काल: कथितो यो मया तव ।
तदहस्तस्य मैत्रेय: विष्णोरीशस्य कथ्यते ॥
नैवाहस्तस्य न निशा नित्यस्य परमात्मन:
उपकारस्तथाप्येष: तस्येशस्य द्विजोच्यते ॥ 12

1 श्रीमद् भागवतपुराणे- १२-४-२.
2 विष्णुपुराणे- ६-३-२.
3 श्रीमद् भागवतपुराणे-१२-४-२.
4 श्रीमद् भागवत:-१२/४/२.
5 विष्णुपुराणे-६-४-७.
6 श्रीमद् भागवतपुराणे-१२-४-४६.
7 कूर्मपुराणम्-उ.४५-८.
8 विष्णुपुराणम्-६-४-२९.
9 श्रीमद् भागवतपुराणम्-१२/४/३४.
10 श्रीमद भागवतपुराणम्-१२/५/३५.
11 विष्णुपुराणम्-१/७/३९.४०
12 विष्णुपुराणम्-६/४/४९/९.